# प्रतिवेदनम्

अन्ताराष्ट्रियमहिलादिनोत्सवः कार्यालयस्य आदेशानुसारं ६-३-२०२५ आरभ्य १२-०३-२०२५ अत्यन्तवैभवेन अनुष्ठितः। अस्मिन् सप्ताहे प्रथमदिने –

**06-03-2025** - अस्मिन् दिने महिलाकल्याणपरिषदः समन्वयकानां बालाजीवर्याणामध्यक्षे काचित् गोष्ठी आयोजिता। तस्यां गोष्ठ्यां सप्ताहस्य स्वरूपं चिन्तितम्। तदैव परिसरे वर्तमानानां वाह्वाप् समुदायः निर्मितः। परिसरीयाः महिलाः स्पर्धानां विषये सूचिताः। एवञ्च वस्त्रफलकं निर्मितम्।




**07-03-2025** – अस्मिन् दिनाङ्के अपराह्णात् महिलाकल्याणपरिषदः समन्वयकाः बालाजीवर्याः बालिकाच्छात्रावासे परिसरीयमहिलानां क्रीडास्पर्धाः आरब्धवन्तः।






**आचार्याणां रामचन्द्रुलबालाजीवर्याणां मार्गदर्शने महिलादिनोत्सवसप्ताहाचारणारम्भः**

1. परिसरीयानां **बोधनबोधनेतरकर्मचारिणीनां** स्पर्धाः आयोजिताः। तत्र गीतीयासन्दक्रीडा (Musical Chair) शिरस्थपुस्तकचलनक्रीडा च आयोजिता। अध्यापिकाः – कवितावर्या, भारतीवर्या, शिवकुमारीवर्या, कार्यालयकर्मचारिण्यः – मञ्जुलावर्या, छात्रावासकर्मचारिण्यः – सावित्रीवर्या, अर्पितावर्या, स्वच्छताकर्मचारिण्यः – पार्वतम्मा, संदरम्मा इत्यादयः भागमगृह्णन्।







**बोधन-बोधनेतरकर्मचारिणीनां स्पर्धासु भावचित्रे**

2. छात्राणां कूपीयोजनस्पर्धा, द्रोणीकन्दुकस्पर्धा, कूपीचैत्यनिर्माणस्पर्धा, निम्बुकचमसस्पर्धा च आयोजिता। अत्र कवितावर्या, भारतीवर्या, शिवकुमारीवर्या, अर्पितावर्या, सावित्रीवर्या पर्यवेक्षणमकार्षुः तथा श्रीनिधिः, मनस्वी, अर्चना श्रीजा, पूजा इत्येताः छात्राः साहाय्यमकार्षुः।




**बालिकानां प्रवृत्ताः विविधाः स्पर्धाः**




**बालिकानां प्रवृत्ताः विविधाः स्पर्धाः**

**08-03-2025 –** शनिवासरे प्रातः कवितावर्यया सौन्दर्यवर्धकाः सूचनाः बालिकाभ्यः प्रादात्। अपराह्णे महिसादिनोत्सवमुपलक्ष्य किञ्चिद्विशिष्टं भोजनं बालिकाभ्यः परिवेषितम्। अपराह्णे त्रिवादनात् परिसरस्य सुदुघानामके बहिरङ्गसभाङ्गने अग्निमनुपयुज्य भोज्यनिर्माणस्पर्धा आयोजिता, तत्र बालिकाः सोत्साहं भोज्यानि निर्माय यथायोग्यं धनमप्यर्जितवत्यः। अत्र कवितावर्या, शिवकुमारीवर्या, अर्पितावर्या, सावित्रीवर्या पर्यवेक्षणमकार्षुः तथा श्रीनिधिः, मनस्वी, अर्चना श्रीजा, पूजा इत्येताः छात्राः साहाय्यमकार्षुः।




बालिकाभ्यः विशेषभोजनपरिवेषणम्




बालिकाः सोन्दर्यवर्धकाः सूचनाः ददती कवितावर्या







निरिन्धनपाकस्पर्धा

**09-03-2025 –** रविवासरे प्रातः सार्धाष्टवादनात् बालाजीवर्याणामाध्वर्ये पाटलद्विचक्रिकायात्रा आरब्धा। मेणसे मुख्यवृत्तादारभ्य राजीवगान्धीपरिसरं यावत् बालिकाः सोत्साहं द्विचक्रिकायात्रां कृतवत्यः। ततः कार्षापणनिष्कासनक्रीडा, नित्रे बद्ध्वा मुखरञ्जनम् इति स्पर्धा, वायुगोलेन चषकयोजनमिति क्रीडा, सूच्यां सूत्रयोजनमिति स्पर्धा, गीतीयासन्दस्पर्धा इति एताः स्पर्धाः छात्राभ्यः आयोजिताः। अत्र कवितावर्या, शिवकुमारीवर्या, अर्पितावर्या, सावित्रीवर्या पर्यवेक्षणमकार्षुः तथा श्रीनिधिः, मनस्वी, अर्चना श्रीजा, पूजा इत्येताः छात्राः साहाय्यमकार्षुः।






**रविवासरे कृता द्विचक्रिका शोभायात्रा**






**रविवासरे आयोजिताः विविधाः स्पर्धाः**

**10-03-2025 –** सोमवासरे प्रातः योगासनानि, प्राणायामः च छात्रावासे योगाचार्याणां पर्यवेक्षणे बालिकाः कृतवत्यः। अपराह्णे For All Women & Girls Rights, Equality, Empowerment इति विषये संस्कृताङ्ग्लहिन्दीकन्नडभाषासु बालिकाः भाषणस्पर्धायां भागं गृहीत्वा भाषणमकार्षुः, तत्र च न्यायनिर्णेत्रीत्वेन शिवकुमारीवर्या, भारतीवर्या च अभूताम्, कवितावर्या च पर्यवेक्षणमकार्षीत्।




**For All Women & Girls Rights, Equality, Empowerment इति विषये प्रवृत्ता भाषणस्पर्धा**



**योगसनानि प्राणायामं च कुर्वत्यः छात्राः**





11-03-2025 – मङ्गलवासरे अपराह्णे द्विवादनात् परिसरे शारदाधन्वन्तरीवैद्यालयस्य वैद्यायाः डा. अर्चनावर्यायाः आहारपद्धतिविषये आयुर्वेदाधारेण उपन्यासः आसीत्, येन परिसरीयाः स्रवाः महिलाः प्रभाविताः, लाभान्विताश्च अभवन्।




**आहारपद्धतिविषयं उपन्यस्तवत्याः वैद्यायाः अर्चनावर्यायाः सम्माननम्**

12-03-20225 – बुधवासरे अपराह्णे त्रिवादनात् महिलादिनोत्सवस्य समारेपसभा आयोजिता। तत्र व्याकरणविभागाध्यापिका भारतीवर्या स्वागतमकरोत् सर्वेषाम्। परिसरस्य निदेशकाः आचार्याः हंसधरझावर्याः अध्यक्षाः अध्यक्षभाषणमकार्षुः, डा.पुष्पा हेगडे वर्या अभ्यागता महिलानां

साधिकारताविषयमभाषत, तथा परिसरस्य उपनिदेशकाः चन्द्रकान्तवर्याः महिलादिनोत्सवमुपलक्ष्य वक्तव्यमदात्, महिलाकल्याणपरिषदः समन्वयकाः बालाजीवर्याः धन्यवादसमर्पणमकार्षुः, अभ्यागता अध्यक्षाश्च स्पर्धासु विजेत्रीभ्यः पुरस्कारान् अदुः। निर्वहणं च शिवकुरमारीवर्ययाकारि, पर्यवेक्षणं च कवितावर्या अकार्षीत्। तत्र साहाय्यं श्रीनिधिः, मनस्वी, पूजा इति एताः छात्राः विदधुः।






महिलादिनोत्सवसाप्ताहिकाचरणस्य समारोपणसमारोहः




अभ्यागतायाः पुष्पावर्यायाः सम्माननम्






**स्पर्धासु विजोत्रीणां पुरस्कारः**

**महिलाकल्याणपरिषदः समन्वयकः**